# आचार्यधर्मकीर्तिविरचिता

# सम्बन्धपरीक्षा

**SAMBANDHA-PARIKSHA**
**OF**
**ACARYA DHARMAKIRTI**
**(With Commentary of Prabhachandra)**

(Under the Project of content Generation with a view to develop E-Databank, E-Learning and E-Sources of Sanskrit Text.)

**Chief Director**
Prof. Radha Vallabh Tripathi
Vice Chancellor

**Director**
Prof. Sarva Narayan Jha
Acting Principal, Rashtriya Sanskrit Sansthan, Lucknow Campus,

**National Coordinator**
Dr. Sukala Mukherjee
Project Officer
(RSKS,New Delhi)

**Principal Investigator**
Prof. Vijay Kumar Jain

**Editor:**
**Dr. Awadhesh Kr. Chaubey**
**Reader**

Department Of Bauddha Darshan
Lucknow Campus, Lucknow

## आचार्यधर्मकीर्तिविरचिता

## सम्बन्धपरीक्षा

## (प्रभाचन्द्रकृतव्याख्योपेता)

ननु चाणूनामय:शलाकाकल्पत्वेनान्योन्यं सम्बन्धाभावत: स्थूलादिप्रतीतेर्भ्रान्तित्वात् कथं तद्वशात् तत्स्वभावो भाव: स्यात्? तथा हि—

### 1- पारतन्त्र्यसम्बन्धपरीक्षा

उक्तञ्च—

**पारतन्त्र्यं हि सम्बन्धः सिद्धे का परतन्त्रता ।**

**तस्मात् सर्वस्य भावस्य सम्बन्धो नास्ति तत्वतः।।1।।**

सम्बन्धोऽर्थानां पारतन्त्र्यलक्षणो वा स्यात्, रूपश्लेशलक्षणो वा स्यात्? प्रथमपक्षे किमसौ निष्पन्नयो: सम्बन्धिनो: स्यात्, अनिष्पन्नयोर्वा? न तावदनिष्पन्नयो:, स्वरूपस्यैवाऽसत्त्वात् शशाश्वविषाणवत्। निष्पन्नयोश्च पारतन्त्र्याभावादसम्बन्ध एव।। 1 ।।

### 2- रुपश्लेषसम्बन्धपरीक्षा

नापि रूपश्लेषलक्षणोऽसौ (अन्योन्यस्वभावानुप्रवेशलक्षण:), सम्बन्धिनोर्द्वित्वे रूपश्लेषविरोधात्। तयोरैक्ये वा सुतरां सम्बन्धाभाव:, सम्बन्धिनोरभावे सम्बन्धायोगात्; द्विष्ठत्वात्तस्य। अथ नैरन्तर्यं तयो रूपश्लेष:? न (इति चेदित्युपरित:); अस्यान्तरालभावरूपत्वेनातात्त्विकत्वात् (तुच्छभावरूपत्वादभावस्य) सम्बन्धरूपत्वायोग:।

निरन्तरतायाश्च सम्बन्धरूपत्वे सान्तरतापि कथं सम्बन्धो न स्यात् (निरन्तरतावत्पदार्थद्वयापेक्षत्वाविशेषात्।) ?

तदुक्तम्—

**रूपश्लेषो हि सम्बन्धो द्वित्वे स च कथं भवेत्।**

**तस्मात् प्रकृतिभिन्नानां सम्बन्धो नास्ति तत्त्वतः।।2।।**

किञ्च—असौ रूपश्लेषः सर्वात्मना, एकदेशेन वा स्यात्? सर्वात्मना रूपश्लेषे अणूनां पिण्डः अणुमात्रः स्यात्। एकदेशेन तच्छलेषे किमेकदेशास्तस्यात्मभूताः, परभूता वा? आत्मभूताश्चेत्; न एकदेशेन रूपश्लेषस्तदभावात् (निरंशत्वादणोः)। परभूताश्चेत्; तैरप्यणूनां सर्वात्मनैकदेशेन वा रूपश्लेषे स एव पर्यनुयोगोनवस्था च स्यात्।।2।।

**3- परापैक्षासम्बन्धपरीक्षा**

उक्तञ्च—

**परापेक्षा हि सम्बन्धः सोऽसन् कथमपेक्षते ।**

**संश्च सर्वनिराशंसो भावः कथमपेक्षते।।3।।**

किञ्च—परोपेक्षैव सम्बन्धः, तस्य द्विष्ठत्वात्। तं चापेक्षते भावः स्वयं सन्, असन् वा? न तावदसन्; अपेक्षाधर्माश्रयत्वविरोधात् खरश्रृंङ्गवत्। नापि सन्; सर्वनिराशंसत्वात् (सर्वेषु निराकांक्षत्वात्), अन्यथा सत्त्वविरोधात्। तन्न परोपेक्षा नाम यद्रूपः सम्बन्धः सिद्ध्येत्।।3।।

**4- द्वयोरेकाभिसम्बन्धपरीक्षा**

तदुक्तम्—

**द्वयोरेकाभिसम्बन्धात् सम्बन्धो यदि तद्द्वयोः ।**

**कः सम्बन्धोऽनवस्था च न सम्बन्धमतिस्तथा।।4।।**

किञ्च—असौ सम्बन्धः सम्बन्धिभ्यां भिन्नः, अभिन्नो वा? यद्यभिन्नः; तदा सम्बन्धिनावेव, न सम्बन्धः कश्चित्, स एव वा, न ताविति? भिन्नश्चेत्; सम्बन्धिनौ केवलौ कथं सम्बद्धौ स्याताम्?

भवतु वा सम्बन्धोऽर्थान्तरम् (सम्बन्धिभ्याम्); तथापि तेनैकेन सम्बन्धेन सह द्वयोः सम्बन्धिनोः कः सम्बन्धः? यथा सम्बन्धिनोर्यथोक्तदोषान्न कश्चित् सम्बन्धः, तथात्रापि। तेनानयोः सम्बन्धान्तराभ्युपगमे चानवस्था स्यात्; तत्रापि सम्बन्धान्तरानुषङ्गात्। तन्न सम्बन्धिनोः सम्बन्धबुद्धिर्वास्तवी; तद्व्यतिरेकेणान्यस्य सम्बन्धस्यासम्भवात्।।4।।

ततः —

**तौ च भावौ तदन्यश्च सर्वे ते स्वात्मनि स्थिताः।**

**इत्यमिश्राः स्वयं भावास्तान् मिश्रयति कल्पना ।।5।।**

तौ च भावौ सम्बन्धिनौ ताभ्यामन्यश्च सम्बन्धः, सर्वे ते स्वात्मनि स्वस्वरूपे स्थिताः। तेनामिश्रा व्यावृत्तस्वरूपाः स्वयं भावाः, तथापि तान्मिश्रयति योजयति कल्पना।।5।।

**5- क्रियाकारकवाचिसम्बन्धपरीक्षा**

**तामेव चानुरुन्धानैः क्रियाकारकवाचिनः।**

**भावभेदप्रतीत्यर्थं संयोज्यन्तेऽभिधायकाः।।6।।**

अत एव (कल्पनैव मिश्रयति यतः) तद्वास्तवसम्बन्धाभावेऽपि तामेव कल्पनामनुरुन्धानैर्व्यवहर्तृभिर्भावानां (स्थिरस्थूलसाधारणाकाररूपः) भेदोऽन्यापोहः (अगोव्यावृत्तिर्गौः, अघटव्यावृत्तिर्घट इत्यादि) तस्य प्रत्यायनाय क्रियाकारकादिवाचिनः शब्दाः प्रयोज्यन्ते—'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादयः। न खलु कारकाणां क्रियया सम्बन्धोऽस्ति; क्षणिकत्वेन क्रियाकाले कारकाणामसम्भवात्।।6।।

**6- कार्यकारणभावसम्बन्धपरीक्षा**

उक्तञ्च—

**कार्यकारणभावोपि तयोरसहभावतः।**

**प्रसिद्ध्यति कथं द्विष्ठोऽद्विष्ठे सम्बन्धता कथम्।।7।।**

(सामान्यसम्बन्धं संदूष्य सम्बन्धविशेषं दूष्यन्नाह) कार्यकारणभावस्तर्हि सम्बन्धो भविष्यति—इत्यप्यसमीचीनम्, कार्यकारणयोरसहभावतस्तस्यापि (क्षणिकत्वात्) द्विष्ठस्यासम्भवात्। न खलु कारणकाले कार्यं तत्काले वा कारणमस्ति, तुल्यकालं कार्यकारणभावानुपपत्तेः, सव्येतरगोविषाणवत्। तन्न सम्बन्धिनौ (कार्यकारणलक्षणौ) सहभाविनौ विद्येते येनानयोर्वर्तमानोऽसौ सम्बन्धः स्यात्। अद्विष्ठे च भावे (कार्यकारणलक्षणे) सम्बन्धतानुपपन्नैव।। 7।।

**7- क्रमभावसम्बन्धपरीक्षा**

**क्रमेण भाव एकत्र वर्तमानोऽन्यनिस्पृहः।**

**तद्भावेऽपि तद्भावात् सम्बन्धो नैकवृत्तिमान्।।8।।**

कार्ये कारणे वा क्रमेणासौ सम्बन्धो वर्तते—इत्यप्यसाम्प्रतम्; यत: क्रमेणापि भाव: सम्बन्धाख्य एकत्र कारणे कार्ये वा वर्त्तमानोऽन्यनिस्पृह:=कार्यकारणयोरन्यतरानपेक्षो नैकवृत्तिमान् सम्बन्धो युक्त:; तदभावेपि= कार्यकारणयोरभावेऽपि तद्भावात्।।8।।

**8- अपेक्षाभावसम्बन्धपरीक्षा**

**यद्यपेक्ष्य तयोरेकमन्यत्रासौ प्रवर्तते।**

**उपकारी ह्यपेक्ष्य: स्यात् कथं चोपकरोत्यसन्।।9।।**

यदि पुन: कार्यकारणयोरेकं कार्यं कारणं (अस्य कार्यस्येदं कारणमिति) वापेक्ष्यान्यत्र कार्ये कारणे वासौ सम्बन्ध: क्रमेण वर्त्तत इति (हेतो:) सस्पृहत्वेन द्विष्ठ एवेष्यते; तदानेनापेक्ष्यमाणेनोपकारिणा (कार्येण कारणेन वा सम्बन्धेन) भवितव्यम्, यस्मादुपकार्यपेक्ष्य: स्यात्, नान्य:। कथं चोपकरोत्यसन्? यदा कारणकाले कार्याख्यो भावोऽसन् तत्काले वा कारणाख्यस्तदा नैवोपकुर्याद् (कार्ये कारणमपेक्ष्य कारणे कार्यमपेक्ष्य यो वर्त्तते सम्बन्धस्तम्); असामर्थ्यात् (खरविषाणादिवत्।)।। 9 ।।

**9- एकार्थभावसम्बन्धपरीक्षा**

**यद्येकार्थाभिसम्बन्धात् कार्यकारणता तयो:।**

**प्राप्ता द्वित्वादिसम्बन्धात् सव्येतरविषाणयो:।।10।।**

किञ्च—यद्येकार्थाभिसम्बन्धात् (सम्बन्धलक्षण) कार्यकारणता तयो: कार्यकारणभावत्वेनाभिमतयो:; तर्हि द्वित्वसंख्यापरत्वापरत्वविभागादिसम्बन्धात् प्राप्ता सा सव्येतरगोविषाणयोरपि (द्वित्वसंख्यालक्षणैकार्थाभिसम्बन्धस्याविशेषात्)।।10।।

**10- द्विष्ठत्वसम्बन्धपरीक्षा**

**द्विष्ठो हि कश्चित् सम्बन्धो नातोऽन्यत्तस्य लक्षणम्।**

**भावाभावोपधिर्योगः कार्यकारणता यदि।।11।।**

न येन केनचिदेकेन सम्बन्धात् सेष्यते; किं तर्हि? सम्बन्धलक्षणेनैवेति चेत्; तन्न, द्विष्ठो हि कश्चित्पदार्थः सम्बन्धः, नातोऽर्थद्वयाभिसम्बन्धादन्यत् तस्य लक्षणम्, येनास्य संख्यादेर्विशेषो व्यवस्थाप्येत।।11।।

**11- योगोपाधिसम्बन्धपरीक्षा**

**योगोपाधी न तावेव कार्यकारणतात्र किम्।**

**भेदाच्चेन्नन्वयं शब्दो नियोक्तारं समाश्रितः।।12।।**

कस्यचिद्भावे (कार्यस्य कारणस्य वा) भावोऽभावे (कार्यकारणतायाः स्यात्) चाभावः (भावाभावौ), तावुपाधी विशेषणं यस्य योगस्य= सम्बन्धस्य स कार्यकारणता यदि न सर्वसम्वन्धः; तदा तावेव योगोपाधी (उपाधिः=विशेषणम्) भावाभावौ कार्यकारणताऽस्तु (सम्बन्धः), किमसत्सम्बन्धकल्पनया? भेदाच्चेत् (जैनानाशङ्क्याह बौद्धः) 'भावे हि भावोऽभावे चाभावः' इति (सम्बन्धस्य) बहवोऽभिधेयाः (चत्वारोऽर्थाः) कथं कार्यकारणतेत्येकार्थाभिधायिना शब्देनोच्यन्ते ? नन्वयं शब्दो (कार्यकारणसम्बन्धप्रतिपादकः कार्यकारणलक्षणः) नियोक्तारं समाश्रितः। नियोक्ता हि यं शब्दं यथा (एकार्थमभिप्रेत्यानेकार्थं वाभिप्रेत्य) प्रयुङ्क्ते तथा प्राह (एकार्थाननेकार्थान् वा),

इत्यनेकत्राप्येका (यथोदधिशब्दः उदकानि अस्मिन्धीयन्ते स उदधिरित्यादिः) श्रुतिर्न विरुध्यते इति तावेव कार्यकारणता।। 12 ।।

**12- अदृष्टदर्शनसम्बन्धपरीक्षा**

**पश्यन्नेक मदृष्टस्य दर्शने तददर्शने ।**

**अपश्यत्कार्यमन्वेति विना व्याख्यातृभिर्जनः।।13।।**

यस्मात् पश्यन्नेकं कारणाभिमतमुपलब्धिलक्षणप्राप्तस्याऽदृष्टस्य (कारणाभिमतपदार्थदर्शनात् पूर्वम्) कार्याख्यस्य दर्शने सति तददर्शने च सत्यपश्यत्कार्यमन्वेति (कथम्? तथा हि) 'इदमतो भवति' इति प्रतिपद्यते जनः 'अत इदं जातम्' इत्याख्यातृभिर्विनापि (शब्दोल्लेखमन्तरेण उपदेशकैः पुरुषैः) ।।13।।

**दर्शनादर्शने मुक्त्वा कार्यबुद्धेरसम्भवात्।**

**कार्यादिश्रुतिरप्यत्र लाघवार्थं निवेशिता।।14।।**

तस्माद् (कारणस्य) दर्शनादर्शने (कार्यस्य, कार्यकारणाभितयोः पदार्थयोः कार्यकारणता भवत्विति) विषयिणि (दर्शनादर्शनलक्षणे ज्ञाने) विषयोपचारात्-भावाभावौ मुक्त्वा कार्यबुद्धेरसम्भवात् (भावाभावावेव कार्य, नान्यदित्यर्थः) कार्यादिश्रुतिरप्यत्र (श्रुतिः=शब्दः) 'भावाभावयोर्मा लोकः प्रतिपदमियतीं (न केवलं कार्यकारण श्रुतिः, किंतु। भावे भावः, अभावे चाऽभाव इत्येतावतीम्) शब्दमालामभिदध्यात्' इति व्यवहारलाघवार्थं निवेशितेति (समर्थिता, इति=सम्बन्धवादी ब्रूते) ।।14।।

**13- भावाभावसम्बन्धपरीक्षा**

तद्भावाभावात् तत्कार्यगतिर्याप्यनुवर्ण्यते ।

सङ्केतविषयाख्या सा सास्नादेर्गोगतिर्यथा।।15।।

अन्वयव्यतिरेकाभ्यां (भावाभावाभ्यामनुमीयमाना यदि कार्यकारणता ताभ्यामन्या तदा दूषणम्) कार्यकारणता नान्या चेत् कथं भावाभावाभ्यां सा प्रसाध्यते (सम्बन्धवादिना)? तदभावाभावात् (तस्य=कारणस्य) लिङ्गात् तत्कार्यतागतिर्याप्यनुवर्ण्यते (अस्य कारणस्येदं कार्यम्, अस्य च कार्यस्येदं कारणमिति) –'अस्येदं कार्यं कारणं च' इति सङ्केतविषयाख्या सा। यथा 'गौरयं सास्नादिमत्त्वात्' (अनुमानेन) इत्यनेन गोव्यवहारस्य विषयः प्रदर्श्यते।।15।।

**भावे भाविनि तद्भावो भाव एव च भाविता ।**

**प्रसिद्धे हेतुफलते प्रत्यक्षानुपलम्भतः ।।16।।**

"यतश्च (प्रकारान्तरेण तावेव कार्यकारणतेति निरूपयति) 'भावे (कार्यलक्षणे) भाविनि=भवन धर्मिणि, तद्भावः=कारणाभिमतस्य भाव एव कारणत्वम्, भावे एव कारणाभिमतस्य भाविता कार्याभिमतस्य कार्यत्वम्' इति प्रसिद्धे प्रत्यक्षानुपलम्भतो हेतुफलते। ततो भावाभावावेव कार्यकारणता, नान्या।।16।।

**एतावन्मात्रतत्त्वार्थाः कार्यकारणगोचराः।**

**विकल्पा दर्शयन्त्यर्थान् मिथ्यार्था घटितानिव।।17।।**

तेनैतावन्मात्रं=भावाभावौ तावेव तत्त्वं (स्वरूपम्) यस्यार्थस्यासावेतावन्मात्रतत्त्वः (कार्यकारणस्य), सोऽर्थो (अर्थः=विषयः) येषां विकल्पानां (भ्रान्तज्ञानानाम्) ते

एतावन्मात्रतत्त्वार्थाः=एतावन्मात्रबीजाः कार्यकारणगोचराः, (विकल्पाः) दर्शयन्ति घटितानिव= सम्बद्धानिवासम्बद्धानप्यर्थान्। एवं घटनाच्च (विकल्पाः) मिथ्यार्थाः ।।17।।

**14- भिन्नाभिन्नसम्बन्धपरीक्षा**

**भिन्ने का घटनाऽभिन्ने कार्यकारणतापि का।**

**भावे ह्यन्यस्य विश्लिष्टौ श्लिष्टौ स्यातां कथं च तौ।।18।।**

किञ्च, असौ कार्यकारणभूतोऽर्थो भिन्नः (परस्परम्), अभिन्नो वा स्यात्? यदि भिन्नः; तर्हि भिन्ने का घटना (सम्बन्धः) स्वस्वभावव्यवस्थितेः (कार्यकारणयोः)? अथाभिन्नः; तदाऽभिन्ने कार्यकारणतापि का? नैव स्यात्।। 18 ।।

**15- संयोगिसमवायसम्बन्धपरीक्षा**

**संयोगिसमवाय्यादि सर्वमेतेन चिन्तितम्।।**

**अन्योन्यानुपकाराच्च न सम्बन्धी च तादृशः।। 19 ।।**

स्यादेतत्, न भिन्नस्याभिन्नस्य (कार्यस्य कारणस्य वा) वा सम्बन्धः। किं तर्हि? सम्बन्धाख्येनैकेन सम्बन्धात्; इत्यत्रापि भावे सत्तायामन्यस्य (प्रत्यर्थोऽयम्, भिन्नस्य) सम्बन्धस्य विश्लिष्टौ (स्वरूपेण) कार्यकारणाभिमतौ श्लिष्टौ स्याताम्, कथं च तौ संयोगिसमवायिनौ? आदिग्रहणात् (कारिकायाम्) स्वस्वाम्यादिकम् (स्वामिभृत्यभावसम्बन्धादिकम्) ।।

सर्वमेतेनानन्तरोक्तेन सामान्यसम्बन्धप्रतिषेधेन चिन्तितम् (निराकृतम्) संयोग्यादीनामन्योन्यमनुपकाराच्चाजन्यजनकभावाच्च न सम्बन्धी (अर्थ:) च तादृशोऽनुपकार्योपकारकभूत:।।19।।

**16- समवायसम्बन्धपरीक्षा**

**जननेऽपि हि कार्यस्य केनचित् समवायिना।**

**समवायो तदा नासौ न ततोऽतिप्रसङ्गतः।।20।।**

अथास्ति कश्चित् (उपकारक:) समवायी (तन्त्वादि:) योऽवयविरूपं कार्यं जनयति, अतो नानुपकारादसम्बन्धितेति; तन्न; यतो जननेऽपि कार्यस्य केनचित् समवायिनाभ्युपगम्यमाने (सम्बन्धवादिना) समवायी (कार्येण समम्), नासौ तदा; जननकाले कार्यस्यानिष्पत्ते: (समवायिना कारेणेन निष्पादनसमये कार्यस्यानिष्पन्नत्वात् कुत: कार्येण समत्वं कारणस्य? तत्कारणे सति तस्य विनष्टत्वात्) । न च ततो जननात् समवायित्वं (तन्तूनाम्) सिद्ध्यति; कुम्भकारादेरपि घटे समवायित्वप्रसङ्गात्।। 20।।

**17- समवायपरत्रपरीक्षा**

**तयोरनुपकारेऽपि (तन्तूनाम्) समवाये परत्र वा।**

**सम्बन्धो यदि (तर्हीति शेष:) विश्वं स्यात् समवायि परस्परम्।। 21 ।।**

तयो: (तन्तुपटयो:) समवायिनो: परस्परमनुपकारेऽपि ताभ्यां वा समवायस्य नित्यतया समवायेन वा तयो: परत्र (असमवायिनि कारणे कार्ये वा) वा क्वचिदनुपकारेऽपि सम्बन्धो यदीष्यते; तदा विश्वं परस्परासम्बद्धं समवायि परस्परं स्यात् (उपकारकत्वाभावाविशेषात्) ।। 21 ।।

**18- संयोगजननपरीक्षा**

**संयोगजननेऽपीष्टौ ततः संयोगिनौ न तौ ।**

**कर्मादियोगितापत्तेः स्थितिश्च प्रतिवर्णिता।। 22 ।।**

इत्यचार्यधर्मकीर्तिविरचिता सम्बन्धपरीक्षा समाप्ता।

यदि च संयोगस्य (सम्बन्धस्य) कार्यत्वात्तस्य ताभ्यां (समवायिभ्याम्) जननात् संयोगिता तयो: (संयोगिनो:) तदा संयोगजननेऽपीष्टौ, तत: संयोगजननान्न तौ संयोगिनौ, कर्मणोऽपि (क्रियाया:) संयोगितापत्ते: (कर्मण: सकाशात्संयोगजननात्, तथा च द्रव्ययोरेव हि संयोग: न कर्मणोरेवेति मतं विघटेत्)। संयोगो ह्यन्यतरकर्मजः (शैलश्येनयो:) उभयकर्मजश्चेष्यते (मल्लयो:)। आदिग्रहणात् संयोगस्यापि (गुणरूपस्य) संयोगिता स्यात् । न संयोगजननात् संयोगिता, किन्तर्हि? स्थापनादिति (संयोगिभ्यां स्थाप्यपदार्थस्य संयोगलक्षणस्य स्थितिनिष्पादनात्) चेत्; स्थितिश्च (संयोगिनोः संयोगस्य च) प्रतिवर्णिता (निराकृता) =ग्रन्थान्तरे प्रतिक्षिप्ता (प्रत्यर्थ:), स्थाप्यस्थापकयोर्जन्यजनकत्वाभावान्नान्या स्थितिरिति (जन्यजनकभावस्तु प्राक् प्रतिक्षिप्त इत्यर्थ:) ।।22।।

इति प्रभाचन्द्रकृता सम्बन्धपरीक्षाव्याख्या समाप्ता ।